स्तधामा च तन्नेन्द्रस्तारको नाम तद्रिपुः ।
हरिर्नपुंसको भूत्वा चालयिष्यति शङ्कर ! ॥
इति गारुडे ८७ अध्याये ॥
(अपरोऽसुरविशेषः । कार्त्तिकेयः एनं निहतवान् । यथा, मत्स्यपुराणे । १४५ । ५—११ ।
"वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्त्रस्तु तारकः ।
सुरानुद्वासयामास पुरेभ्यः स महाबलः ॥
ततस्ते ब्रह्मणोऽभ्यासं जग्मुर्भयनिपीड़िताः ।
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषामुवाच ह ॥
सन्त्यजध्वं भयं देवाः । शङ्करस्यात्मजः शिशुः ।
तुहिनाचलदौहित्रस्तं हनिष्यति दानवम् ॥
ततः काले तु कस्मिंश्चित् दृष्ट्वा वै शैलजां शिवः ।
स्वरेतो वह्निवदने व्यसृजत्कारणान्तरे ॥
तद्प्राप्तं वह्निवदने रेतो देवानतर्पयत् ।
विदार्य्य जठराण्येषां अजीर्णं निर्गतं मुने ! ॥
पतितं तत् सरिद्वरे ततस्तु शरकानने ।
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः ।
स सप्तदिवसो बालो निजघ्ने तारकासुरम् ॥"
अस्य विशेषविवरणन्तु तत्रैव१४५अध्यायमारभ्य १५६ अध्यायेषु द्रष्टव्यम् ॥ तारयतीति । तॄ + णिच् + ण्वुल् ।) कर्णधारः । इति मेदिनी । के, ६८ ॥ भेलकः । इति शब्दरत्नावली ॥ (तरणोपायः । यथा, हठयोगप्रदीपिकायाम् ।४।४०।
"केचिदागमजालेन केचिन्निगमसङ्कुलैः ।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् ॥"
"तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति ।" इति तट्टीका ॥ महादेवः । यथा, महाभारते । १२ । २८४ । ३५ ।
"गर्भमांसशृगालाय तारकाय तराय च ।
नमो यज्ञाय यजिने हुताय प्रहुताय च ॥" )
त्रातरि, त्रि । इति मेदिनी । के, १०० ॥ (यथा, प्रबोधचन्द्रोदये । २ । १३ ।
"कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधम् ॥"
स्त्रियां टापि अत इत्वम् । यथा, गोः रामायणे । २ । ६७ । २३ ।
"नारीणां तारिकाः काश्चित् काश्चित् परमवाजिनाम् ॥")
तारकजित्, पुं, ( तारकं तारकासुरं जयतीति । जि + क्विप् तुगागमश्च ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥ ( एतद्विवरणं मात्स्ये १५६ अध्याये द्रष्टव्यम् ॥ )
तारकब्रह्म, क्ली, (तारकं संसारसागरपारकारकं ब्रह्म ।) षड़क्षरमन्त्रविशेषः । यथा,—
"षड़क्षरं महामन्त्रं तारकं ब्रह्म उच्यते ।
ये भजन्ति च मां भक्त्या तेषां मुक्तिर्न संशयः ॥
रामाय नम इत्येवमुच्चार्य्यं मन्त्रमुत्तमम् ।
सर्व्वदुःखहरश्चैतत् पापिनामपि मुक्तिदम् ॥
इमं मन्त्रं जपन्नित्यममलस्त्वं भविष्यसि ।
भस्माग्निधारणाद्यस्तु सम्भूतस्त्वामुपैष्यति ॥
महलं तदभूत मन्त्रं मन्त्रोच्चारणात् शुभात् ।
तमध्येनं श्रीरामतारकाख्येन मन्त्रतः ॥
भूत्वा काश्यां विश्वनाथो महाक्षापरिपालकः ।
हत्वा मुक्तान् जीवमात्रान् मानुषादीन् परं पदम् ॥
अन्यत् किन्ते भयं मन्त्रप्रभावात् प्रापयिष्यसि ।
इति सन्दिश्य मां विष्णुर्विससर्ज्ज मरुद्गणान् ॥"
इति पाद्मोत्तरखण्डे श्रीशिवं प्रति श्रीविष्णुवाक्यम् ॥ अपि च ।
"मुमूर्षोर्मुनिकर्णान्तु अर्द्धोदकनिवासिनः ।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् ॥
ओँ श्रीरामरामरामेत्येतत्तारकमुच्यते ।
अतस्त्वं जानकीनाथ ! परं ब्रह्म विनिश्चितम् ॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिववाक्यम् ॥
तारका, स्त्री, क्ली, ( तरति तारयति वा । तॄ + णिच् + ण्वुल् । टाप् । "तारका ज्योतिषि ।" ७ । ३ । ४५ । इत्यस्य वार्त्तिकोक्त्या न अत इत्वम् ।) नक्षत्रम् । (यथा, मार्कण्डेये ।२५।७१।
"अप्-बिन्दवो यथाम्भोधौ यथा वा दिवि तारकाः ।
यथा वा वर्षतो धारा गङ्गायां सिकता यथा ॥")
कनीनिका । इति मेदिनी । के, १०० ॥
( यथा, रघुः । ११ । ६९ ।
"क्षत्त्रकोपदहनार्च्चिषं ततः
सन्दधे दृशमुदग्रतारकाम् ॥" )
इन्द्रवारुण्यां स्त्री । इति राजनिर्घण्टः ॥
तारकारिः, पुं, (तारकस्य तारकासुरस्य अरिः ।) कार्त्तिकेयः । इति हेमचन्द्रः । २ । १२३ ॥
तारकिणी, स्त्री, ( तारकाः सन्त्यत्र । तारका + इनिः ङीप् । ) रात्रिः । इति राजनिर्घण्टः ॥
तारकितं, त्रि, (तारकाः सञ्जाता अस्य । तारका + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् । ) तारकायुक्तम् । यथा,—
"सिति निशा हृदि स्फुटदुत्पतत्
कणगणाधिपतारकिताम्बरः ॥"
इति नैषधम् ॥
तारणः, पुं, (तारयतीति । तॄ + णिच् + ल्युः । ) भेलकः । इति शब्दरत्नावली ॥ (संसारसागरात् तारयतीति । विष्णुः । यथा, महाभारते ।१३ । १४९ । ५० ।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥"
महादेवः । यथा, तत्रैव । १३ । १७ । ११७ ।
"तोरणस्तारणो वातः परिधीपतिखेचरः ॥"
क्ली, षष्टिवत्सरेषु अष्टादशवत्सरः । यथा, ज्योतिषतत्त्वे ।
"अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम् ।
शस्यं भवति सामान्यं तारणे सुरवन्दिते ! ॥"
तथाच वृहत्संहितायाम् । ८ । ३९ ।
"तारणं तदनु भूरिवारिदं
शस्यवृद्धिमुदितञ्च पार्थिवम् ॥"
तॄ + णिच् + भावे ल्युट् । उत्तारणम् । उद्धारणम् । यथा, महाभारते । ४ । ४ । ५३ ।
"तारणायास्य दुःखस्य प्रस्थानाय जयाय च ॥")
तरणकारयितरि, त्रि ॥
तारणिः, स्त्री, ( तारयतीति । तॄ + णिच् + अनिः । ) नौका । इति हारावली । ५६ ॥
तारतण्डुलः, पुं, ( तारं मुक्तेव शुभ्रस्तण्डुलो यस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥
तारतम्यं, क्ली, तरतमयोर्भावः । ( तरतम + ष्यञ् । ) न्यूनाधिक्यम् । यथा,—
"निर्द्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा ।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका ॥"
इत्युद्भटः ॥
तारदी, स्त्री, ( तरदी एव । स्वार्थे अण् ततो ङीष् । ) तरदीवृक्षः । इति राजनिर्घण्टः ॥
तारपुष्पः, पुं, ( तारं रूप्यमिव शुभ्रं पुष्पं यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः ॥
तारलः, त्रि, ( तरल एव । स्वार्थे अण् । ) विटः । इति भूरिप्रयोगः ॥
तारविमला, स्त्री, ( तारं रूप्यमिव विमला । ) धातुविशेषः । इति शब्दार्थकल्पतरुः ॥
तारशुद्धिकरं, क्ली, ( तारस्य रजतस्य शुद्धिं करोतीति । कृ + टः । ) सीसकम् । इति राजनिर्घण्टः ॥
तारा, स्त्री, पुं, (तारयतीति । तॄ + णिच् + अच् ।) नक्षत्रम् । इत्यमरः । १ । ३ । २१ ॥ ( यथा, महाभारते । १ । २११ । २६ ।
"चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः ॥" )
यथाच कर्म्मलोचने ।
"एकतारं नभो दृष्ट्वा सर्व्वतो नारदो मुनिः ।
तावद्भ्रमति चाण्डालो यावदन्यां न पश्यति ॥"
अक्षिमध्यम् । इति मेदिनी । रे, ४३ ॥ शेषस्य पर्य्यायः । त्रिमिनी २ कनीनिका ३ । इति राजनिर्घण्टः ॥ तारका ४ । इत्यमरः ।१।३।२१॥ ( यथा, हठयोगप्रदीपिकायाम् । ४ । ३६ ।
"तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ ॥")
तारा, स्त्री, ( तारयति तापादिति । तॄ + णिच् + अच् + टाप् । ) बुद्धदेवताभेदः । बृहस्पतिभार्य्या । इति मेदिनी । रे, ४३ ॥ (यथा, देवीभागवते । १ । ११ । ७५ ।
"ततः कालेन कियता तारासूत सुतं शुभम् ॥")
बालिभार्य्या । सा सुषेणवानरकन्या । इति रामायणम् ॥ (यथा, महाभारते ।३।२७९।१८।
"हेममाली ततो बाली तारां ताराधिपाननाम् ।
उवाच वचनं वाग्मी तां वानरपतिः पतिः ॥")
चौड़ा । मुक्ता । इति राजनिर्घण्टः ॥ * ॥
द्वितीया शक्तिः । यथा,—
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी ॥
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तिता ॥"